दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-4 ■ वर्ष-4 ■ अङ्क-263 | 1 | जुलाई 21 , 2025 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com


**पञ्चाङ्गम्**

अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् श्रावणकृष्णैकादशी
श्रावण 06 प्रविष्ठांशः मङ्गलमयः भवेत्


2 हिमाचलप्रदेशे प्रशिक्षुनीतिः कार्यान्वितुं युनां कर्मचारिणां च मध्ये महदाक्रोशः, पुनर्विचारस्य आग्रहः

3 संस्कृतभाषा एव आयुर्वेदस्य आत्मा वर्तते- आयुर्वेदशिरोमणिः आचार्यः डा. बृजेश शास्त्री

4 असमप्रदेशान्तर्गतस्य राष्ट्रियभाषाविद्यालयप्राङ्गणे, सप्तदिवसीय- बोधनवर्गस्य समापनकार्यक्रमः सुसम्पन्नः


## 'फिट् इण्डिया सण्डेस् ऑन् 'साईकिल' इत्यस्य अभियानस्य नेतृत्वं क्रीडामन्त्री मनसुख-माण्डविया इत्यनेन कृतम्



हिमसंस्कृतवार्ताः। वाराणसीनगरस्य बनारस-हिन्दू-विश्वविद्यालये केन्द्रीय-युव-प्रकरणानां क्रीडामन्त्री मनसुखमाण्डविया इत्यनेन 'फिट् इण्डिया सण्डेस् ऑन् 'साईकिल' इत्यस्य अभियानस्य नेतृत्वं कृतम् । केन्द्रीयमन्त्री उक्तवान् यत्, अस्य अभियानस्य माध्यमेन सर्वासु शैक्षणिकसंस्थासु नशा मुक्ति-सन्देशं, षट्सहस्रतोऽपि अधिकेषु स्थानेषु प्रसारितम् अस्ति ।

## भारतं एड्-फेल्काइ-वॉक्स् (AdFalciVax) इति नामकं बहुचरणीयं मलेरियाटीकां विकासयति




हिमसंस्कृतवार्ताः। भारतं एड्-फेल्काइ-वॉक्स् (AdFalciVax) इति नामकं बहुचरणीयं मलेरियाटीकां विकासयति । अस्य टीकायाः उद्देश्यं मानवसंक्रमणात् रक्षणं प्रदातुं तथा च परजीविनः सञ्चार-जनित-सामुदायिक-संक्रमणस्य न्यूनीकरणं वर्तते। एड्-फेल्काइ-वॉक्स् इति प्रथमा स्वदेशीया पुनर्संयोजिता काइमेरिक मलेरिया टीका अस्ति यत् विशेषतया मलेरियायाः अत्यन्तं घातकरूपेण उत्तरदायी परजीवी प्लास्मोडियम, फाल्सिपेरम इत्यनयोः द्वयोः महत्त्वपूर्णयोः चरणयोः लक्ष्यं कर्तुं विनिर्मितम् अस्ति। भारतीयचिकित्सासंशोधनपरिषद् सम्प्रति जैवप्रौद्योगिकी-विभागेन-राष्ट्रीयप्रतिरक्षाविज्ञानसंस्थायाः सहयोगरूपेण एतस्य मलेरियाटीकायाः विकासं करोति ।

## एथलेटिक्स-क्रीडायां मुरलीश्री शङ्करः दीर्घ-कूर्द-उपाधिं प्राप्तवान्

एथलेटिक्स-क्रीडायां मुरलीश्रीशङ्करः सप्त दशमलव सप्त-पंच मीटर्-पर्यन्तं कूर्दनं कृत्वा पुर्तगाल-क्रीडा-समारोहे -दीर्घ-कूर्द-उपाधिं प्राप्तवान्। अवधेयमस्ति यत्, एतत् आयोजनम्, विश्व-एथलेटिक्स-महाद्वीपीय-भ्रमण-कांस्यस्तरीय-मेलनस्य भागः अस्ति।

## संसदस्य मानसूनसत्रे द्वयोः सदनयोः सुचारुरूपेण कार्य सुनिश्चेतुं,सर्वकारेण सर्वपक्षीयसंगोष्ठी कृता,



### अद्य आरभ्य मानसूनसत्रं अगस्तमासस्य एकविंशति-दिनाङ्कपर्यन्तं भविष्यति

हिमसंस्कृतवार्ताः। संसदस्य मानसूनसत्रे द्वयोः सदनयोः सुचारुरूपेण कार्य सुनिश्चेतुं, सत्रात् पूर्वम्, सर्वकारेण सर्वपक्षीयसंगोष्ठी कृता। सत्रस्य सुचारुरूपेण संचालनार्थं विपक्षदलेभ्यः सहकार्यं प्राप्तुं सर्वकारेण एषा सभा आहूता आसीत्। लोकसभा-राज्यसभायाः प्रतिनिधित्वं कुर्वन्तः विभिन्नराजनैतिकदलानां दलनेतारः सभायां उपस्थिताः आसन्। केन्द्रीयमन्त्री तथा राज्यसभायां सदनस्य नेता जगत प्रकाश नड्डा इत्यस्य अध्यक्षतायां संसदीयकार्यमन्त्री किरेन रिजिजुः, संसदीयकार्याणां राज्यमन्त्रिणः अर्जुनराममेघवालः, डॉ. एल. मुरुगनः च उपस्थिताः आसन्। तदतिरिक्तं काङ्ग्रेस-दलात् गौरवगोगोई, प्रमोद तिवारी च, एन्.सि.पी.-एस.सी.पी-तः सुप्रिया सुले, डी.एम. के-तः तिरुचि शिवा, समाजवादी पार्टीतः रामगोपाल यादवः, डीएमकेतः टी आर बालू, आप-इतिदलात् संजयसिंहः च सभायां भागं गृहीतवन्तः । सभायाः अनन्तरं वार्ताहरैः सह भाषणं कुर्वन् संसदीयकार्याणां मन्त्री किरेन रिजिजुः अवदत् यत्, संसदीयकार्याणां सुचारुरूपेण संचालनाय सर्वकारस्य विपक्षस्य च समन्वयस्य आवश्यकता वर्तते । अद्य आरभ्य मानसूनसत्रं अगस्तमासस्य एकविंशति-दिनाङ्कपर्यन्तं भविष्यति । अधिवेशनकाले द्वयोः सदनयोः आहत्य एकविंशतिः अधिवेशनानि भविष्यन्ति। सत्रस्य अवसरे जन-विश्वास-विधेयकः-विंशति-पञ्चविंशतिः, राष्ट्रियक्रीडाशासनविधेयकः विंशति-पञ्चविंशतिः, व्यापारिक-नौकायान-विधेयकः विंशति-पञ्चविंशतिः, इत्यादिभिः सह महत्त्वपूर्णविधेयकाः चर्चायै पारितार्थं च उपस्थापयितुं शक्यन्ते ।

## प्रधानमन्त्री नरेन्द्रमोदी बुधवासरात् (यूके) इति ब्रिटेन देशस्य मालदीवस्य च द्वयोः राष्ट्रयोः यात्रां करिष्यति



हिमसंस्कृतवार्ताः। प्रधानमन्त्री नरेन्द्रमोदी बुधवासरात् (यूके) इति ब्रिटेन देशस्य मालदीवस्य च द्वयोः राष्ट्रयोः यात्रां करिष्यति। यात्रायाः प्रथमे चरणे प्रधानमन्त्री जुलाईमासस्य त्रयोविंशति दिनाङ्कात् चतुर्विंशति दिनाङ्कपर्यन्तं ब्रिटेन-देशस्य समकक्षस्य कीर् स्टारमर इत्यस्य आमन्त्रणे ब्रिटेन-देशं गमिष्यति। अस्मिन् भ्रमणावधौ प्रधानमन्त्री मोदी भारत-ब्रिटेन-द्विपक्षीयसम्बन्धानां सम्पूर्णपरिधिविषये प्रधानमन्त्रिणा स्टारमर इत्यनेन सह विस्तृतविमर्श करिष्यति। क्षेत्रीयवैश्विकमहत्त्वयोः विषयेषु अपि विचारविनिमयं करिष्यति। श्रीमोदी महामहिम राज्ञा चार्ल्स-तृतीयेन सहापि मिलिष्यति इति अपेक्षास्ति । निज-यात्रायाः द्वितीये चरणे प्रधानमन्त्री मोदी अस्य मासस्य पञ्चविंशति दिनाङ्कात् मालदीवस्य राष्ट्रपतिः डॉ. मोहम्मद मुइज्जु इत्यस्य आमन्त्रणे द्विदिवसात्मके मालदीव-यात्रायां भविष्यति । सः मालदीवस्य स्वातन्त्र्यस्य षष्ठीवर्षस्योत्सवे' मुख्यातिथिः' भविष्यति। यात्रावधौ सः मालदीवस्य राष्ट्रपतिना सह मिलित्वा परस्पर हितानां विषयेषु चर्चा करिष्यति

## सुभाषितम्

**न कुलं वृत्तहीनस्य,
प्रमाणमिति में मतिः।
अन्तेष्वपि हि जातानां,
वृत्तमेव विशिष्यते॥**

अर्थात्- कुल से मनुष्य की पहचान नहीं हो सकती। मनुष्य की पहचान उसके सदाचार से होती है, भले ही वह किसी भी कुल में क्यों न पैदा हुआ हो।


प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest h|msanskr|tvartah Da|ly Sanskr|t Newspaper every day, wr|te Hello on 7876636263 Watsapp


**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

## वियतनामदेशे हा-लाङ्ङ्-बे इत्यत्र पर्यटकनौकायाः प्रत्यावर्त्य जलमग्नानन्तरं मृतानां संख्या अष्टत्रिंशत्



वियतनामदेशे हा-लाङ्ङ्-बे इत्यत्र पर्यटकनौकायाः प्रत्यावर्त्य जलमग्नानन्तरं मृतानां संख्या अष्टत्रिंशत् अभवत्, यतः अद्यापि अदृश्यानां अन्वेषण-उद्धार-कार्यक्रमाः निरन्तरं प्रचलन्ति । परह्यः एषा घटना तदा अभवत् यदा नौका क्षेत्र-व्यापी-प्रबल-चक्रवातेन ग्रस्ता अभवत्, येन निमग्नात् पूर्व अधिकारिभिः सह सम्पर्कः नष्टः अभवत् । क्रूज-नौकायां त्रिपंचाशत् जनाः गच्छन्ति स्म, येषु पञ्च चालकदलस्य सदस्याः अष्टचत्वारिंशत् यात्रिणः च आसन्, येषु बहवः युवानः बालकाः च आसन् इति सूच्यते। प्रतिकूलवायुस्थितेः, प्रचण्डवृष्टेः च मध्येऽपि उद्धारदलानि दश-जनान् जलात् उद्धारयितुं समर्थानि अभवन् ।

# हिमाचलप्रदेशे श्रावण-अष्टमीमेलापके श्रीनैनादेवीमन्दिरे ध्वनिविस्तारयन्त्रे, ढक्का- दुन्दुभिः वादने प्रतिबन्धः



हिमसंस्कृतवार्ताः- बिलासपुरम्। रविवासरे निर्गतस्य वक्तव्यस्य अनुसारं २५ जुलाईतः ३ अगस्तपर्यन्तं प्रचलति श्रावण-अष्टमीमेलायां श्रीनैनादेवीमदिरस्य परिसरे ध्वनिविस्तारयन्त्रस्य प्रयोगे, ढक्का-दुन्दुभिः इत्यादीनां वादने प्रतिबन्धः कृतः। आदेशानुसारं जिलादण्डाधिकारी राहुलकुमारः मन्दिरपरिसरे संयावः, नारिकेलं, प्रसादं च अर्पयितुं बंशस्य कण्डोलोपयोगे अपि प्रतिबन्धं कृतवान् अस्ति। सुविधां, सुरक्षां, स्वच्छतां च मनसि कृत्वा एषः निर्णयः कृतः।

## भक्तेभ्यः शान्तिं स्थापयितुम् आह्वानम्-

विज्ञप्तौ उक्तं यत् मेलाकाले श्री नैनादेवीपरिसरे ध्वनिविस्तारयन्त्र- ढक्का-दुन्दुभि- इत्यादीनां ध्वनिप्रवर्धकयन्त्राणां प्रयोगे जिलादण्डाधिकारी पूर्णतया प्रतिबन्धं कृतवान् अस्ति। आवश्यकाः सार्वजनिकसन्देशाः वा घोषणाः केवलं नियन्त्रणकक्षद्वारा एव प्रसारिताः भविष्यन्ति। मेलाकाले प्रशासनेन निर्धारितानां नियमानाम् अनुसरणं कृत्वा मन्दिरपरिसरस्य शान्तिपूर्णम् अनुशासितं च वातावरणं निर्वाहयितुं सहकार्यं कुर्वन्तु इति मण्डलप्रशासनेन आह्वानं कृतम् अस्ति।

## ५०० गृहरक्षकाणां परिनियोजनाय निर्देशाः

जिलादण्डाधिकारी राहुलकुमारः जनसमूहं नियन्त्रयितुं विधि-व्यवस्थां निर्वाहयितुम् जिलप्रशासनेन पर्याप्तव्यवस्था कृता इति उक्तवान्। गृहरक्षकाणां पञ्चमवाहिनी, बिलासपुरस्य मेलायां ५०० गृहरक्षकान् (महिलागृहरक्षकान् सहितम्) नियोजयितुं निर्देशः दत्तः अस्ति। मेलायां नियुक्तानां गृहरक्षकानां वेतनं वृत्तिश्च श्रीनैनादेवीमन्दिरन्यासद्वारा क्रियते। मेलाकाले टोबातः श्री नैनादेवीजीमन्दिरपर्यन्तं मार्गे बृहद्वाहनानां गमने अपि प्रतिबन्धः कृतः अस्ति। ततः परं यदि ट्रकयानानि, टेम्पोयानानि, ट्रैक्टरयानानि वा यात्रिकाणां वहन्तः दृश्यन्ते तर्हि तेषां हिमाचलप्रदेशस्य सीमातः परं श्री नैनादेवीजीं प्रति गरामोडातः ग्वालथाईतः (भाखड़ा) अग्रे गन्तुं अनुमतिः न भविष्यति, भक्ताः बसयानेषु वा टैक्सीयानेषु वा आरुह्य गन्तुं प्रवृत्ताः भविष्यन्ति।

# हिमाचलप्रदेशे प्रशिक्षुनीतिः कार्यान्वितुं युनां कर्मचारिणां च मध्ये महदाक्रोशः, पुनर्विचारस्य आग्रहः

## कर्मचारीसङ्घटनानि स्वस्य "सुप्तावस्थां" परित्यज्य एकीकृत्य अन्यायपूर्णनीतेः विरुद्धं स्वरं उत्थापयन्तु

हिमसंस्कृतवार्ताः-हिमाचलप्रदेशसर्वकारेण अनुबन्धनीतिं समाप्तं कृत्वा प्रशिक्षुनीतिं कार्यान्वितुं निर्णयं कृत्वा राज्यस्य अनुद्योगियुवकेषु सेवारतकर्मचारिषु च गभीरा असन्तुष्टिः वर्तते। अस्याः नूतनायाः नीतेः अन्तर्गतं द्विवर्षीयं प्रशिक्षुकालं सम्पन्नं कृत्वा अभ्यर्थिनः पुनः परीक्षायां उपस्थिताः भवेयुः येन सर्वकारीयं कार्यं प्राप्तुं शक्यते। युनः विविधाः कर्मचारीसङ्घटनानि च अस्य प्रावधानस्य विषये तीक्ष्णप्रतिक्रियाम् अददन्, "एषः निर्णयः अनुद्योगिभ्यः महान् अन्यायः" इति उक्तवन्तः। अस्मिन् निर्णये गम्भीरान् प्रश्नान् उत्थापयन् राज्यस्य सर्वेभ्यः क्षेत्रेभ्यः स्वराः उत्थापिताः सन्ति यत् सर्वकारस्य कार्याणां संस्थानां च समाप्त्यर्थं "षड्यंत्रं" कुर्वन्तं सर्वकारं कः एतादृशं "असत्यपरामर्शं" ददाति। राज्यस्य युनां आरोपः अस्ति यत् प्रशासनिककाधिकारिणः स्वपदं सुरक्षितं कृतवन्तः चेदपि एतया नीत्या कर्मचारिणां भविष्यं संकटग्रस्तं जातम्।

युनां कर्मचारिणां च संस्थाः स्पष्टतया वदन्ति यत् एषा नीतिः न केवलं युनां स्वप्नान् मर्दयिष्यति, अपि तु सर्वकारीयक्षेत्रे अनिश्चिततां अस्थिरतां च प्रवर्धयिष्यति। तेषां मतं यत् वर्षद्वयस्य परिश्रमस्य प्रशिक्षणस्य च अनन्तरम् अपि पुनः परीक्षणस्य प्रावधानं सर्वथा अयुक्तं अन्यायपूर्णं च अस्ति। विभिन्नाः वर्गाः हिमाचलप्रदेशसर्वकारेण अस्य निर्णयस्य तत्क्षणं पुनर्विचारं कृत्वा निरस्तं कर्तुं आग्रहं कुर्वन्ति। अपि च, एतादृशेभ्यः "असत्यपरामर्शदातृभ्यः" सावधानाः भवितुम् अपि सर्वकाराय सचेतना दत्ता अस्ति। अस्मिन् गम्भीरे विषये हिमाचलप्रदेशस्य सर्वेभ्यः कर्मचारीसंस्थाभ्यः अपि दृढम् आह्वानं कृतं यत् ते स्वस्य "सुप्तावस्थातः" जागृत्य एकीकृत्य अस्याः अन्यायपूर्णनीतेः विरुद्धं स्वरं उत्थापयन्तु। यदि संस्थाः कालान्तरे ठोसपदं न गृह्णन्ति तर्हि तेषां स्वस्य अस्तित्वस्य समाप्तिः भविष्यति इति सचेतना दत्ता अस्ति। अयं निर्णयः हिमाचलप्रदेशस्य लक्षशः युनां भविष्ये, सर्वकारीयसेवासंरचनायां च दूरगामी नकारात्मकं प्रभावं कर्तुं शक्नोति। जनहिताय एतस्य तत्कालं संज्ञानं कृत्वा न्यायपूर्णं समाधानम् अन्वेष्टुं सर्वकाराद् अनुरोधः कृतः अस्ति।

# केन्द्रीयदलेन थुनाग-जंजैहली-स्थलयोः आपदाप्रभावितक्षेत्रेषु क्षतिविषये निरीक्षणं कृतम्



हिमसंस्कृतवार्ताः - लघ्वीकाशी मण्डी। मण्डीमण्डले वर्षर्तौ मेघविस्फोटस्य, जलप्रलयस्य, भूस्खलनस्य च क्षतेः आकलनाय आगतं केन्द्रीयदलं रविवासरे थुनाग उपविभागस्य प्रभावितक्षेत्राणां भ्रमणं कृतवान्। केन्द्रीयदलेन बगस्याड़े, तत्समीपस्थे शरणग्रामे च जनानां गृहेषु अन्येषु च सम्पत्तिषु क्षतिः जाता तस्य आकलनं कृतम्। अस्मिन् काले अत्र स्थितानां औद्योगिक- प्रशिक्षणसंस्थानानाम् अन्येषां च क्षतिग्रस्तसंरचनानां निरीक्षणमपि दलेन कृतम्। ग्रामपंचायतमुरहागस्य फनयारे महता भूस्खलनेन क्षतिविषये अपि च ढांगुधारे छड़ी- उपनद्यां निर्मितपेयजलयोजनायाः क्षतिविषये सूचना प्राप्ता। तदनन्तरं केन्द्रीयदलेन थुनागविपण्यां गृहेषु, आपणेषु, विविधसंस्थासु च या क्षतिः जाता तस्याकलनं कृतम्आ। एतेन सह थुनाग-विपण्यां, अत्रत्याम् अर्थव्यवस्थायां च प्रचण्डजलप्रलयस्य प्रभावस्य विषये सूचना अपि प्राप्ता। आपदि दुर्गतिरूपेण प्रभाविते देजीग्रामे जलप्रलयेन प्रक्षालितस्य मार्गस्य अन्येषां सार्वजनिकसम्पत्त्याः च क्षतिः केन्द्रीयदलेन गृहीता। उपायुक्तः अपूर्वदेवगनः एतेषु क्षेत्रेषु व्यापकक्षतिविषये केन्द्रीयदलं बोधितवान्। अत्र क्रियमाणस्य जीर्णोद्धारकार्यस्य विषये अपि सः सूचनां दत्तवान्। केन्द्रीयदलेन लम्बथाचस्य शैक्षणिकसंस्थानां क्षतिः, पाण्डवशिला- कुथाहयोः मार्गाणाम् अन्यसार्वजनिक- निजीसम्पत्त्याः च क्षतिः, बुङ्गरैलचतुष्पथि मार्गमूलसंरचनायाः, स्थानीयविपण्यादि- मूलसंरचनायाः च क्षतिः इति सम्यक् निरीक्षणं कृतम्। अस्मिन् समये स्थानीयविधायकः विपक्षनेता च जयरामठाकुरः अपि केन्द्रीयदलेन सह उपस्थितः भूत्वा क्षेत्रे आपदः क्षतिविषये सूचनां प्रकटीकृतवान्। विशेषसचिवः (राजस्वः आपदाप्रबन्धनम्) डी. सी. राणा इत्यनेन आपद्-प्रभावितक्षेत्रेषु राज्यसर्वकारेण क्रियमाणस्य आश्रयपुनर्वासिकार्यस्य विषये केन्द्रीयदलाय सूचना दत्ता। अस्मिन् केन्द्रीयदले गृहमन्त्रालये संयुक्तसचिवः (CS & Public, Judicial) जी. पार्थसारथी, उपसचिवः (एफसीडी) कंदर्प वी. पटेलः, वित्तमंत्रालयस्य अंतर्गतं व्ययविभागः, वसीम अशरफ, निदेशकः सीडब्ल्यूसी शिमला जलशक्तिमंत्रालयस्य अंतर्गतम्, करण सरीनः, ऊर्जामन्त्रालयस्य अंतर्गतम्, सीईए उपनिदेशकः, मुख्याभियंता ए. के. कुशवाहा, क्षेत्रीयकार्यालयः शिमला, पथपरिवहनं एवं राजमार्गमन्त्रालयः, ग्रामीणविकासमन्त्रालयस्य अवरसचिवः दीपशेखरः सिंघलः एवं कृषि तथा कृषककल्याणमन्त्रालयस्य अन्तर्गतं गोधूम-विकासनिदेशालयस्य संयुक्तनिदेशकः डॉ. विक्रांतसिंहः उपस्थिताः अभवन्। अस्मिन्नवसरे अतिरिक्तपुलिसाधीक्षकः सचिन हिरेमठः, अतिरिक्तजिलादंडाधिकारी डॉ. मदनकुमारः, एसडीएम थुनागः रमेशकुमारः एवं संबंधितविभागानां वरिष्ठाधिकारिणः उपस्थिताः -

# केन्द्रीयगृहमन्त्री अमितशाहः बहुक्षेत्रीय-केन्द्रीयदलस्य सङ्घटनस्य निर्देशं दत्तवान्

हिमसंस्कृतवार्ताः - कार्यालयीयः प्रतिनिधिः। रविवासरे केन्द्रीयगृहमन्त्री अमितशाहः हिमाचलप्रदेशे प्राकृतिकविपदाम् आवृत्तिं तीव्रताम् च दृष्ट्वा बहुक्षेत्रीयकेन्द्रीयदलस्य सङ्घटनस्य निर्देशं दत्तवान्। केन्द्रीयदले राष्ट्रिय आपदाप्रबन्धनप्राधिकरणस्य (एन. डी. एम. ए.), केन्द्रीयभवनसंशोधनसंस्थानस्य (सीबीआरआई) रूड़की, भारतीय-उष्णकटिबंधीय- ऋतुविज्ञानसंस्थानस्य (आईआईटीएम) पुणे, एकः भूवैज्ञानिकः, भारतीयप्रौद्योगिकीसंस्थानस्य (आईआईटी) इन्दौरस्य च विशेषज्ञाः सन्ति।केन्द्रीयमन्त्रिणः अयं निर्देशः अधुनैव समागमस्य अनन्तरम् अभवत् यस्मिन् सः सूचितवान् यत् हिमाचलप्रदेशे मेघविस्फोटस्य, आकस्मिकजलप्रलयस्य, भूस्खलनस्य, प्रचण्डवृष्टेः च आवृत्तिः तीव्रता च वर्धिता, येन जीवनस्य सम्पत्तेः च बृहत्प्रमाणेन हानिः, आधारभूतसंरचनानां, आजीविकायाः, पर्यावरणस्य च क्षतिः अभवत् ततः परं राज्यस्य विभिन्नेषु भागेषु दक्षिणपश्चिममानसून २०२५ मध्ये जलोप्लवम्, आकस्मिकजलप्रलयं, भूस्खलनं च दृष्ट्वा केन्द्रेण पूर्वमेव तेषां ज्ञापनपत्रस्य प्रतीक्षां विना क्षतिस्थले एव मूल्याङ्कनं कर्तुं अन्तर्मन्त्रालयीयकेन्द्रीयदलं (IMCT) नियोजितम् अस्ति। आईएमसीटीद्वारा १८ जुलाईतः प्रभावितक्षेत्राणां भ्रमणं आरब्धम्, २१ जुलैपर्यन्तं च स्वभ्रमणं निरन्तरं करिष्यति। अस्यां दिशि केन्द्रीयगृहमन्त्रिणः नेतृत्वे उच्चस्तरीयसमित्या हिमाचलप्रदेशाय जलोपप्लवम्, भूस्खलन, मेघविस्फोटः इत्यादिषु आपद्भिः प्रभावितेषु क्षेत्रेषु २००६.४० कोटिरूप्यकाणां व्ययस्य अनुमोदनं पूर्वमेव कृतम्, अपि अस्मिन् वर्षे जुलाईमासस्य ७ दिनाङ्के ४५१.४४ कोटिरूप्यकाणां प्रथमांशं विमोचितम्। अपि च, राज्यस्य प्रभावितजनानां समर्थनार्थं केन्द्रसर्वकारेण राज्यविपदाप्रतिक्रियाकोषात् (एसडीआरएफ) १९८.८० कोटिरूप्यकाणां केन्द्रीयभागस्य प्रथमांशं तात्कालिकप्रकृतेः आश्रयप्रतिक्रियाकोषाणां कृते २०२५ तमस्य वर्षस्य जूनमासस्य १८ दिनाङ्के विमोचितम् अस्ति। उद्धाराय, आश्रयकार्याय च हिमाचलप्रदेशे १३ एनडीआरएफ-दलानि नियोजितानि सन्ति। हिमाचलप्रदेशस्य राज्य आपदाप्रबन्धनप्राधिकरणस्य (SDMA) अनुसारं २० जून दिनाङ्के मानसूनस्य ऋतोः आरम्भात् आरभ्य राज्ये सर्वत्र प्रायः ११९ जनानां प्राणाः गताः सन्ति।

# संस्कृतभाषा एव आयुर्वेदस्य आत्मा वर्तते- आयुर्वेदशिरोमणिः आचार्यः डा. बृजेश शास्त्री



**हिमसंस्कृतवार्ताः- प्रवेशकुमारशुक्लः, लखनऊ)** उत्तरप्रदेशसंस्कृतसंस्थानेन संचालकस्य विनयश्रीवास्तवस्य मार्गदर्शनेन चालितायाः ऑनलाइनप्रशिक्षणपाठ्यक्रमनिर्माणयोजनायाः अन्तर्गतं सरलसंस्कृतवार्तालापवर्गे प्रेरणासत्रस्य आरम्भः सरस्वतीवन्दनाद्वारा कृतः। सरस्वतीवन्दनं जूही अकरोत्। संस्थानगीतिका ज्योतिः द्वारा प्रस्तुतमभवत्। समन्वयकः दिव्यारंजनमहोदयः परिचयः स्वागतसम्बोधनञ्च अकरोत्। सत्रस्य संचालनं प्रशिक्षकः रजनीकुमारमहोदयः अकरोत्। स्वागतगीतं वैभवपाण्डेयद्वारा प्रस्तुतं संस्कृतगीतं गौरव द्वारा प्रस्तुत। रुचिता पद्मिनी च कक्षायाः अनुभवं प्रकटितवत्यौ। प्रेरणासत्रस्य मुख्यवक्ता आयुर्वेदशिरोमणिः आचार्यः डॉ. बृजेशशास्त्री स्वभाषणे संस्कृतभाषायाः महत्त्वं प्रकाशयित्वा उपस्थितजनेभ्यः अवदत् यत् संस्कृतभाषा। महाकविः दण्डी इत्यनेन अपि संस्कृतं देवानां भाषा इति प्रस्तावः कृतः संस्कृतस्य ज्ञानपरम्परा अतीव उत्तमः, तस्य उच्चारणं रोगाणां चिकित्सां करोति। मनसि अन्तःकरणे च संस्कृतभाषायाः आदरः भवेत्, अनेके रोजगारस्य अवसराः अपि संस्कृते एव निहिताः सन्ति। संस्कृतम् अस्माकं भारतीयसंस्कृतेः धरोहरम् अस्ति अतः अस्माभिः तस्य गर्वः भवितव्यः। एतादृशैः प्रेरणादायकैः वचनैः सर्वे अभिभूताः आसन्। अन्ते प्रशिक्षकः लल्लनबाबूमौर्य अतिथिभ्यः कृतज्ञतां प्रकटितवान्। कार्यक्रमे उत्तरप्रदेश-संस्कृतसंस्थानस्य निदेशकः विनयश्रीवास्तवः, प्रशासनिकपदाधिकारी जगदानन्द झा, दिनेशमिश्रः, योजना प्रमुखः भगवानसिंहः, प्रशिक्षणप्रमुखः सुधिष्ठा मिश्रः, समन्वयकः धीरज मैथानी, दिव्या रंजनः, राधाशर्मा रजनीशकुमारः, दीपिकामिश्रा इत्यादयः उपस्थिताः आसन्। अन्ते शान्तिमन्त्रेण सूचनायाश्च सह कार्यक्रमस्य सफलतापूर्वकं समाप्तिः अभवत्। कार्यक्रमस्य संयोजनं प्रशिक्षिका दीपिकामिश्रा कृतवती।

# तीव्राघातेन व्यथितः किङ्गखानः उपचाराय सद्यो धावितोऽमेरिकाम्



हिमसंस्कृतवार्ताः- चलच्चित्रजगतो नटसम्राट् शाहरुखखानो नाम स्वस्य आगामिनः किङ्गनामकस्य चलच्चित्रस्य चित्रणे व्यस्त आसीत्। सिद्धार्थानन्द-निर्देशितस्य तस्य चित्रनिर्माणकाले मुम्बापुर्याम् अकस्मात्तस्य पृष्ठे तीव्र आघातो जातः। सद्य एव स चिकित्सार्थं प्रथमं संयुक्तराज्यामेरिकां गतः ततश्चाधुना संयुक्ताधिराज्ये स्थित्वा स्वास्थ्यलाभं करोति। अस्मिन्काले तस्य परिवारोऽपि तेन सार्धं वर्तते। सूत्रज्ञा वदन्ति यदाघातस्तु लघुः परं तस्य स्वास्थ्यं शनैः शनैः सुदृढं भवति। एतस्मात् कारणाच्चलच्चित्रस्य निर्माणकार्यं सम्प्रति स्थगितमस्ति तत्पुनः सप्ताम्बरमासे प्रारप्स्यते। आघातकारणादेव तस्य प्रस्ताविता श्रीलङ्कायात्रापि स्थगिता जाता।

अहो न खल्विदं प्रथमं यदा नायकोऽयं रङ्गभूमौ व्रणितोऽभूत्। तस्य पीडाचरितं सुदीर्घमस्ति। पूर्वमपि शक्तिनाम्नश्चित्रस्य निर्माणे तस्य पृष्ठवंशे महती पीडा समुत्पन्ना यदर्थं तस्य शस्त्रक्रियापि विदेशेऽभवत्। डरनामकस्य चलच्चित्रस्य काले तस्य त्रीणि पर्शुकानि वामजानुश्च भग्नमासीत्। कोयलाचलच्चित्रस्य काले स एव जानुव्रणः पुनर्वर्धितो भूत्वा रावनचित्रस्य समये महतीं वेदनां प्रादात्। अपरञ्च दुल्हामिलगयाचलच्चित्रस्य युद्धदृश्ये तस्य वामस्कन्ध आघातः समभवत् स एवाघातः मायनेमिच्खानचलच्चित्रस्य निर्माणे पुनरवर्धत। एवं बहुवारमाघातं सोढ्वापि स स्वकर्मणि निरन्तरं रतो भवति। अथ किङ्गनामकस्य चलच्चित्रस्य का वार्ता। अस्मिन् चलच्चित्रे शाहरुखखानस्य सुता सुहानाखानोऽपि प्रथमवारं चलच्चित्रपटले स्वकीयामभिनयक्षमतां प्रदर्शयिष्यति। तामतिरिच्य पादुकोणदीपिका बच्चनाभिषेकोऽहलावतजयदीपः कपूरानिलो वर्माभयः चेत्येतेऽपि प्रमुखा भूमिका निर्वक्ष्यन्ति। सर्वे प्रेक्षकाः पितुः पुत्र्याश्च युगपद्दर्शनार्थमुत्सुकाः सन्ति॥

# संस्कृतभारतीकानपुरप्रान्तस्य द्विदिवसीया वृहद्गोष्ठी परिसम्पन्ना




**हिमसंस्कृतवार्ताः- आचार्यदीन-दयालशुक्लः, कानपुरम्।**

संघटनस्यविकासाय संवर्धनाय च दृष्ट्या समायोज्यमाणा संस्कृतभारत्याः द्विदिवसीया प्रान्तस्य गोष्ठी कानपुरस्य स्थाने परिसम्पन्ना। अस्यां गोष्ठ्यां पूर्वी उत्तरप्रदेशक्षेत्रस्य क्षेत्रसंघटनमन्त्री प्रमोदपण्डित-डॉ कन्हैयालाल झावर्यौ समुपस्थितौ। कार्यकतृभिः उभाभ्यामपि पाथेयं प्राप्तवन्तः। उद्घाटनसत्रे प्रान्तमन्त्री आचार्य चन्द्रप्रकाशत्रिपाठी महोदयेन समुपस्थितानाम् अतिथीनां कार्यकतृणाञ्च स्वागतम् अकारि। तदनु प्रान्तसहमन्त्रिणा डॉ. रत्नेशत्रिवेदीवर्येण गोष्ठ्याः प्रास्ताविकमुपस्थापितम्। अस्यां द्विदिनात्मिकां प्रान्तीयगोष्ठ्यां कानपुरप्रान्तस्य १४ जनपदेभ्यः विभिन्नकार्यकर्तारः विभिन्नेषु सत्रेषु संस्थायाः विविधविकासविषयेषु चर्चां कृत्वा समाधानं प्राप्तवन्तः। संस्कृतस्य विकासाय संस्कृतं साधारणभाषां करणं च प्रान्तीयस्तरात् मण्डलस्तरं यावत् मण्डलस्तरात् विकासखण्डस्तरं यावत् विकासखण्डात् ग्रामस्तरं यावत् संस्थायाः कार्याणि नेतुम् उद्दिश्य एषा संगोष्ठी आयोजिता आसीत्। संगोष्ठ्याः एकः सत्रः मुख्यतया अखिलभारतीयसम्मेलनस्य विषये आसीत्, यत् नवम्बरमासे तमिलनाडुराज्यस्य कोयम्बटूरनगरे भविष्यति। कोयम्बटूरे आयोज्यते अस्मिन् अखिलभारतीयसम्मेलने देशविदेशेभ्यः संस्थायाः कार्यकर्तारः उपस्थिताः भूत्वा विविधविषयेषु चर्चां करिष्यन्ति। अयं कार्यक्रमः नवम्बरमासस्य ७, ८, ९ दिनाङ्केषु भविष्यति। तत्र गन्तुं श्रमिकाः पूर्वमेव सज्जतां प्रारब्धाः सन्ति। विशेषसत्रं सम्बोधयन् पूर्वी उत्तरप्रदेशक्षेत्रस्य सङ्गठनमन्त्री अस्मिन् मासे संस्कृतदिवसस्य, संस्कृतसप्ताहस्य च आयोजनसम्बद्धेषु विविधविषयेषु चर्चां कृत्वा कार्यकर्तारं सम्बोधितवान्। संस्कृतसप्ताहे, संस्कृतसप्ताहे, संस्कृतदिवसस्य च विभिन्नस्थानेषु विद्यालयेषु, सामाजिकसंस्थासु, सामाजिकस्थानेषु च आयोजनं करणीयम्, प्रतियोगिताः करणीयाः, गीतापाठः, संस्कृतस्य प्रचारः, शोभायात्रा इत्यादीनां आयोजनं करणीयम् इति निर्देशाः दत्ताः। कार्यकर्तारः संयुक्तचर्चायां एतत् प्रकटितवन्तः। श्रावणपूर्णिमायाम् आचरितस्य संस्कृतदिवसस्य सज्जतायाः विषये कार्यकर्तृषु उत्साहः दृष्टः। गतसत्रे सर्वेषां कार्यकर्तृणां धन्यवादः कृतः, शान्तिमन्त्रेण च संगोष्ठ्याः समापनम् अभवत्। अस्मिन् कार्यक्रमे जयनारायण शुक्लः, डॉ. सर्वेश कुमार शाण्डिल्यः, डॉ. स्नेहा अवस्थी, मिनी मिश्रा, डॉ. प्रदीप शुक्लः, निमिष त्रिपाठी, आनन्द अवस्थी, स्मृतिः, प्रीती, मनोज अवस्थी, महेश श्रीवास्तवः मनीष दीक्षितसहितम् अनेके कार्यकर्तारः उपस्थिताः आसन्।

# 'सैयारा' चलचित्रं दृष्ट्वा महेशबाबूः अवदत् 'किम् अद्भुतं चलच्चित्रं निर्मितम्, यस्मिन् कथा प्रामाणिकतया कथिता' इति



**हिमसंस्कृतवार्ताः- जगदीश डाभी, मुम्बई।**

अनन्या पाण्डे इत्यस्य भ्रातुः अहान पाण्डे इत्यस्य प्रथमचलच्चित्रस्य 'सैयारा' इत्यस्य बॉक्स ऑफिस इत्यत्र प्रचण्डा प्रतिक्रिया प्राप्ता अस्ति। अनित पड्डा अपि अस्मिन् चलच्चित्रेण बॉलीवुडक्षेत्रे पदार्पणं कृतवान्। सैयारा अहान-अनितयोः कृते प्रथमं बॉलीवुड- चलच्चित्रम् अस्ति। मोहितसूरी इत्यनेन निर्देशितम् एतत् चलच्चित्रं बहु प्रशंसां प्राप्नोति। बृहत् प्रसिद्धाः जनाः अस्य चलच्चित्रस्य निरन्तरं प्रशंसां कुर्वन्ति। दक्षिणस्य नायक-महेशबाबूः अपि सैयारा दृष्टवान् अस्ति। महेश बाबू इत्यस्मै सैयारा रोचते स्म। चलच्चित्रं दृष्ट्वा महेशबाबूः सामाजिकमाध्यमेषु विवरणं स्थापितं कृतवान्। तस्मिन् विवरणमध्ये महेशबाबूः सैयारादलस्य कृते तत् नमस्कारं लिखितवान्। किम् अद्भुतं चलच्चित्रं निर्मितम्, यस्मिन् कथा प्रामाणिकतया कथिता, उत्तमं प्रदर्शनं, अग्रिमस्तरीयं निष्पादनं च। अहान पाण्डे, अनिता पड्डा च एतावता सहजतया स्वपात्राणां अनुरूपं जीवनं यापयितुं महत् प्रेम। एतत् चलच्चित्रं यत् प्रेम प्राप्नोति तत् सर्वम् अर्हति।

## श्रीमद्भागवतप्रवचनम्- १५



✍असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

कुमाराः वदन्तः आसन् यत्, नारद! सत्यभाषणपूर्वकं तथा ब्रह्मचर्यपालनपूर्वकं सदैव भागवतकथायाः श्रवणम् अत्यन्तम् उत्तमं मन्यते । परन्तु कलियुगे एतत् कठिनं, प्रायः न सम्भवेद्वा; तस्मात् शुकदेवेन यः विशेषविधिः निर्दिष्टः वर्तते, सः ज्ञातव्यः। कलियुगे बहुदिनानि यावत् चित्तवृत्तीनां वशीकरणं, नियमबद्धता, पुण्यकार्यार्थं दीक्षितता इत्यादिकं कठिनकार्यम्; तस्मात् सप्ताहश्रवणस्य विधिः वर्तते। श्रद्धापूर्वकं कदाचिदपि श्रवणेन, अथवा माघमासे श्रवणेन यत्फलं प्राप्यते, तदेव फलं श्रीशुकदेवेन सप्ताहश्रवणात् लभ्यते इति निर्दिष्टमस्ति। मनसः असंयमः, रोगाणां बहुलता, अल्पायुः इत्यादिकारणतः, तथा कलियुगे बहूनां दोषाणां सम्भावनातः हि सप्ताहश्रवणस्य विधानं कृतं वर्तते। यत्फलं तपसा, योगेन, समाधिना चापि न प्राप्यते, तत् सर्वाङ्गरूपेण कृतेन सप्ताहश्रवणेन, सहजतया हि उपलभ्यते। सप्ताहश्रवणं यज्ञात् व्रतात्, तपसः चापि उत्कृष्टतरं वर्तते। किमधिकम्! एतत् सप्ताहश्रवणं सर्वसाधनम् अतिक्रम्य गर्जति।

शौनकः पृष्टवान्- सूतवर्य! एतत्तु भवता आश्चर्यकरं वचनं कथितम्। अवश्यमपि इदं भागवतपुराणं योगवेत्तुः ब्रह्मदेवस्य अपि आदिकारणं श्रीनारायणं निरूपयति; परन्तु एतत् कथानकं मोक्षप्राप्तिकाराणां ज्ञानादिसर्वसाधनानाम् अपि तिरस्कारं कृत्वा, तेभ्यः साधनेभ्यः अपि कथम् उत्कृष्टतां गतम्?

सूतदेवः अकथयत्- शौनक! यदा भगवान् श्रीकृष्णः एतत् धराधाम परित्यज्य स्वकीयं नित्यधाम प्रति गन्तुम् उद्यतः अभवत्, तदा तस्य श्रीमुखात् एकादशस्कन्दस्य ज्ञानोपदेशं विश्रुत्य अपि उद्धवः एवं पृष्टवान्- 'गोविन्द! भक्तानां कार्यं विधाय अधुना त्वं परमधाम यास्यसि, परन्तु मन्मनसि एका महती चिन्ता विद्यमाना अस्ति, तच्छ्रुत्वा माम् आश्वासय, सुखञ्च यच्छ। इतः परं शीघ्रमेव घोरकलिकालः समागच्छेत्, तस्मात् संसारे पुनः अनेके दुष्टाः प्रादुर्भवेयुः; तेषां संसर्गेण यदा बहवः सज्जनाः अपि उग्रमतयः भवेयुः, तदा तेषां भारेण भारयुता गोरूपा इयं पृथ्वी कस्य शरणम् आगच्छेत्? हे कमलनयन! अहं तु भवदतिरिच्य अस्याः रक्षकम् अपरं न कमपि पश्यामि। तस्मात् कारणात् भक्तवत्सल प्रभो! त्वं साधूनामुपरि कृपां विधाय, इतः मा क्वापि गच्छ । त्वं स्वयं निराकारः तथा चिन्मात्रमेव सन्नपि भक्तकल्याणार्थं हि एनं सगुणरूपं धृतवान् असि नु? तव वियोगात् ते भक्तजनाः पृथ्व्यां कथं स्थातुमर्हेयुः? निर्गुणोपासनं तु कष्टकरमेव, अतः इतोऽपि विचारय भगवन्! इति, शुभम्। (माहात्म्यम् -०३/४६-५९)

## श्रावणमासः

श्रावणमासः हिन्दूधर्मे अत्यन्तं पुण्यपरम्परायुक्तः मासः। अयं मासः देवाधिदेवमहादेवस्य आराधनाय समर्पितः इत्येव प्रतिपद्यते। विशेषतया सोमवारेषु सम्पाद्यमानं व्रतं "श्रावण-सोमव्रतम्" इत्यभिधीयते। श्रवणमासे सम्प्राप्ते, जलधरमण्डलीभूत- गगनमण्डलेऽपि शीतलमेघ-प्रवर्षणसहितं पवित्रवातावरणं निर्मीयते। अस्मिन्नेव मासे गङ्गाविष्णुप्रसादित-शिवलिङ्गाभिषेकसमारम्भाः, बिल्वपत्रार्पणक्रमशः, धूप- दीप- कुसुम- नैवेद्य-समर्पणपूर्वकं शिवपूजनं, च अत्यन्तं श्रद्धया निष्पाद्यते। श्रावणस्य सोमवासरेषु नक्तव्रतपालनपूर्वकं जलाहारव्रतं, सत्यसङ्कल्पयुक्तं प्रदोषकालपूजनम्, महादेवस्य षोडशोपचार- नियमपूजनविधिः, रुद्राष्टाध्यायीपारायणम्, रुद्राभिषेकसंस्कारः, अत्यन्तं पुण्यदायकानि साधनानि सन्ति। एतेषु सोमवारेषु कृतं पूजनं सर्वपापप्रशमनकारणम्, आरोग्यसौभाग्यवृद्धिकरम्, सकलाभीष्टसिद्धिप्रदायकम्, गृहक्लेशविनाशकं च भवति। श्रावणस्य सोमव्रतं कान्तिकल्पसमर्पितस्त्रीजनैः, धर्मपरायणैः गृहस्थैः, मोक्षाभिलाषिभिः संन्यासिभिः च, प्रत्येकशः श्रद्धापूर्वकं पालनार्हं स्मृतम्। **शास्त्रेषु उक्तम्-**

**"श्रावणे शिवपूजा च सोमवारे विशेषतः।**
**बिल्वपत्रैः समायुक्ता सा देवं तुष्यती ध्रुवम्॥"**

एवं सम्यगुपास्य भगवान् रुद्रः भक्तानां सर्वान् अभिलाषितफलान् प्रदत्तुं स पवृत्तो भवति। श्रावण-सोमव्रतस्य महिमा कल्पान्तपर्यन्तवर्णनीयः इत्युक्तं व्रतशास्त्रेषु।

**डा महेश शर्मा , दर्शनविभागाध्यक्षः**
**सम्पूर्णानन्द संस्कृत विश्वविद्यालयङ्गभूत महाविद्यालय वाराणसी**

## असमप्रदेशान्तर्गतस्य राष्ट्रियभाषाविद्यालयप्राङ्गणे, सप्तदिवसीय- बोधनवर्गस्य समापनकार्यक्रमः सुसम्पन्नः



**हिमसंस्कृतवार्ताः।** गतरविवासरे असमप्रदेशान्तर्गतस्य विश्वनाथजनपदस्य विश्वनाथनगरे, एकस्मिन् राष्ट्रियभाषाविद्यालयप्राङ्गणे, संस्कृतभारतीगोष्ठ्या समायोजितस्य सप्तदिवसीय- बोधनवर्गस्य समापनकार्यक्रमः, शताधिकानां संस्कृतप्रेमिणाम् उपस्थित्याम् अत्यन्तं सुन्दरतया सुसम्पन्नः अभवत्। मान्यवरस्य श्रीहितेश्वरदास- महाभागस्य अध्यक्षतायां सभेयं परिचालिता आसीत्। विश्वनाथमहाविद्यालयस्य अध्यक्षेण चिन्तामणिशर्ममहोदयेन दीपप्रज्वलनम् तथा बालिकाभिः च शान्तिपाठः अक्रियत। निर्दिष्टवक्तृत्वेन विश्वनाथमहाविद्यालयस्य सेवानिवृत्तः विज्ञानप्राध्यापकः मान्यवरः अमरज्योतिबरठाकुरः महाभागः उपस्थितः आसीत्। उपस्थितेषु लोकनाथशास्त्रिमहाभागः, नारदोपाध्यायः, प्राध्यापकः डा. दिपेनभराली महाभागः, खाउण्डमहाभागः, सेवकोईराला, दामोदरबरालः, अशोकदाहालः, रमादेवी भगिनी, लतादेवी, गुप्तमहाभागः, अन्ये शिक्षकाः, शिक्षिकादयः अन्यतमाः आसन्। एवमेव वार्ताहराः, संस्कृतानुरागिणः, युवानः, युवतयः, प्रियच्छात्राः उपस्थिताः आसन्। सभामध्ये छात्रेभ्यः प्रमाणपत्रमपि प्रदत्तम्। सभा प्रायशः संस्कृतमाध्यमेन एव प्रवर्तिता। मध्ये मध्ये प्रेमिभिः गीतनृत्यादिकमपि परिवेशितम्। आदिनं प्रवर्तमाना सभेयम् आकर्षिका, मनोमोहिका, प्रेरिका च आसीत्। अन्ते सभाध्यक्षमहोदयस्य मन्तव्यं, धन्यवादज्ञापनादिकं विधाय सभा विसर्जिता अभवत्।

मञ्चपरिचालकः- सेवकोईरालामहोदयः, संस्कृतशिक्षकः इति।

## भाषायाः शुद्धिः व्याकरणेन एव भवति- डॉ. ज्ञानेन्द्र सापकोटावर्यः

**हिमसंस्कृतवार्ताः- सचिनशर्मा,**
**मोदीनगरम्, गाजियाबादम् , उ. प्र.**

उत्तरप्रदेश- संस्कृत- संस्थानस्य निदेशकः विनय श्रीवास्तवः। तदीये निर्देशणे सञ्चालितायाः ऑनलाइन- प्रशिक्षण- पाठ्यक्रम- निर्माण- योजनायाः अन्तर्गतानां सञ्चाल्यमानां सरल- संस्कृत- संभाषण- कक्षाणां परतया आयोज्यमानस्य प्रेरणासत्रस्य शुभारब्धस्त्र। प्रेरणासत्रस्य मुख्यवक्ता वाराणसीनगरे स्थिते सम्पूर्णानन्द- संस्कृत- विश्वविद्यालयस्य व्याकरणविभागस्य सहायकाचार्यः डॉ. ज्ञानेन्द्रसापकोटावर्यः स्ववक्तव्ये संस्कृतभाषायाः महत्त्वं प्रकाशय, "किम् नाम व्याकरणम्? कथं व्याकरणं विधीयते? सर्वदा किमर्थम् आवश्यकं व्याकरणम्?" इति विषये विमर्शः कृतः। तेन उक्तं यत् संस्कृतम् अस्माभिः निश्चयेन पठनीयम्। अस्माभिः अस्याः भाषायाः गौरवेन अनुभूयते।" संस्कृतभाषायाः व्याकरणस्य च अध्ययनं प्रचारः च अस्माकं सर्वेषां दायित्वम्। सुभाषितानि लोकानां सौहार्दं, विश्वबन्धुत्वं च जागरयन्ति। अतः प्रतिदिनं एकं सुभाषितं पठनीयम्, प्रतिदिनं योगाभ्यासः अपि करणीयः।

अन्ते प्रशिक्षकः सचिन शर्मा आगतानां सर्वेषां धन्यवादं प्रकटितवान्। कार्यक्रमे उत्तरप्रदेश- संस्कृत- संस्थानस्य अधिकारिणः योजनाप्रभारी प्रधानसहायकः भगवान सिंह चौहानः, प्रशिक्षणप्रमुखः सुधिष्ठमिश्रः, समन्वयकाः धीरज मैठाणी, दिव्यरञ्जनः, राधाशर्मा अन्ये च मार्गदर्शकाः उपस्थिताः। प्रशिक्षुणा श्रद्धामिश्रया सरस्वतीवन्दना विहिता। संस्थानगीतिका अलीशया प्रस्तुता, स्वागतगीतं पूजागौड़वर्या गीतवती। आगतानाम् अतिथीनां स्वागतं मुख्यवक्तुः च परिचयं प्रास्ताविकं समन्वयको दिव्यरञ्जनवर्यः कृतवान्। सत्रस्य सञ्चालनं प्रशिक्षकेण डॉ. दिवाकरमिश्रवर्येण कृतम्। समग्रं तकनीकीसञ्चालनम् अशोकमिश्रवर्येण निर्व्यूढम्। प्रशिक्षकः सचिन शर्मा प्रेसविज्ञप्तिं लिखितवान् प्रकाशनं च कारितवान्। आगतानाम् अतिथीनां परिचयं प्रशिक्षिका नीलमरानी कृतवती। कक्षायाः अनुभवः- आनन्दमिश्रः, वैदिक मङ्गलाचरणम्- विवेकपाण्डेयः, संस्कृतगीतम्- जाह्नवीवर्या, सुभाषितश्लोकानां प्रस्तुतिश्च प्रवीणप्रकाशवर्येण इत्येतैः छात्रैः च सम्प्रस्तुताः। शान्तिमन्त्रं नीतु- सक्सेना कृतवती। कार्यक्रमे सूचनादानं दिवाकरमिश्रेण कृतम्। एवं कार्यक्रमे प्रशिक्षकः सचिन शर्मा, अशोकमिश्रः, नीलमरानी, दिवाकरमिश्रः, च अपि समायोजनसहभागिनः आसन्। बहवः छात्राः, विदेशिकाश्च आसन्, सामाजिक-जनाः च अपि उत्साहेन उपस्थाय स्वं परिस्पदनं अयच्छन्। "सर्वे भवन्तु सुखिनः, सर्वे सन्तु निरामयाः" इति भावेन कार्यक्रमः संपन्नः।